# ॥ महागणपतिस्तोत्रम् ॥

योगं योगविदां विधूत-विविध-व्यासंगशुद्धाशय-
प्रादुर्भूत-सुधारस-प्रसृमर-ध्यानास्पदाध्यासिनाम् ।
आनन्दप्लवमान-बोधमधुरा-ऽऽमोदच्छटामेदुरं
तं भूमानमुपास्महे परिणतं दन्तावलास्यात्मना ॥ १॥
तारश्री-परशक्तिकामवसुधा-रूपानुगं यं विदुस्तस्मै
स्तात्प्रणतिर्गणाधिपतये यो रागिणाऽभ्यर्थ्यते ।
आमन्त्र्य प्रथमं वरेति वरदेत्यार्तेन सर्वं जनं
स्वामिन् मे वशमानयेति सततं स्वाहादिभिः पूजितः ॥ २॥
कल्लोलांचल-चुम्बिताम्बुद-तताविक्षुद्रवाम्भोनिधौ
द्वीपे रत्नमये सुरद्रुमवनामोदैकमेदस्विनि ।
मूले कल्पतरोर्महामणिमये पीठेऽक्षराम्भोरूहे
षट्कोणा कलित-त्रिकोणरचना-सत्कर्णिकेऽमुं भजे ॥ ३॥
चक्रप्रास-रसाल-कार्मुक-गदा-सद्बीजपूरद्विज-
व्रीह्यग्रोत्पल-पाशपंकजकरं शुण्डाग्रजाग्रद्घटम् ।
आश्लिष्टं प्रियया सरोजकरया रत्नस्फुरद् भूषया
माणिक्यप्रतिमं महागणपतिं विश्वेशमाशास्महे ॥ ४॥
दानाम्भः-परिमेदुर-प्रसृमर-व्यालम्बिरोलम्बभृत्
सिन्दूरारूण-गण्डमण्डलयुग-व्याजात् प्रशस्तिद्वयम् ।
त्रैलोक्येष्ट विधानवर्णसुभगं यः पद्मरागोपमं
धत्ते स श्रियमातनोतु सततं देवो गणानां पतिः ॥ ५॥
भ्राम्यन् मन्दरघूर्णनापरवश-क्षीराब्धिवीचिच्छटा-
सच्छायाश्चल-चामर-व्यतिकर-श्रीगर्वसर्वङ्कषाः ।
दिक्कान्ताघन-सारचन्दनरसा-साराःश्रयन्तां मनः
स्वच्छन्दप्रसर-प्रलिप्तवियतो हेरम्बदन्तत्विषः ॥ ६॥
मुक्ताजालकरम्बित-प्रविकसन्-माणिक्यपुंजच्छटा-
कान्ताः कम्बुकदम्ब-चुम्बितघनाम्भोज-प्रवालोपमाः ।
ज्योत्स्नापूर-तरंग-मन्थरतरत्-सन्ध्यावयस्याश्चिरं
हेरम्बस्य जयन्ति दन्तकिरणाकीर्णाः शरीरत्विषः ॥ ७॥
शुण्डाग्राकलितेन हेमकलशेनावर्जितेन क्षरन्
नानारत्नचयेन साधकजनान् सम्भावयन् कोटिशः ।
दानामोद-विनोदलुब्ध-मधुप-प्रोत्सारणाविर्भवत्
कर्णान्दोलनखेलनो विजयते देवो गणग्रामणीः ॥ ८॥

हेरम्बं प्रणमामि यस्य पुरतः शाण्डिल्यमूले श्रिया
बिभ्रत्याम्बुरूहे समं मधुरिपुस्ते शङ्खचक्रे वहन् ।
न्यग्रोधस्य तले सहाद्रिसुतया शम्भुस्तथा दक्षिणे
बिभ्राणः परशुं त्रिशूलमितया पाशाङ्कुशाभ्यां सह ॥ ९ ॥
पश्चात् पिप्पलमाश्रितो रतिपतिर्देवस्य रत्योत्पले
बिभ्रत्या सममैक्षवं धनुरिषून् पौष्पान् वहन् पञ्च च ।
वामे चक्रगदाधरः स भगवान्क्रोडः प्रियङ्गोस्तले
हस्तोद्यच्छुकशालिमंजरिकया देव्या धरण्या सह ॥ १० ॥
षट्कोणाश्रिषु षट्सु षङ्गजमुखाः पाशाङ्कुशाभीवरान्
बिभ्राणाः प्रमदासखाः पृथुमहाशोणाश्म-पुञ्जत्विषः ।
आमोदः पुरतः प्रमोदसुमुखौ तं चाभितो दुर्मुखः
पश्चात् पार्श्वगतोऽस्य विघ्न इति यो यो विघ्नकर्तेति च ॥ ११ ॥
आमोदादिगणेश्वर-प्रियतमास्तत्रैव नित्यं स्थिताः
कान्ताश्लेषरसज्ञ-मन्थरदृशः सिद्धिः समृद्धिस्ततः ।
कान्तिर्या मदनावतीत्यपि तथा कल्पेषु या गीयते
साऽन्या यापि मदद्रवा तदपरा द्राविण्यमूः पूजिताः ॥ १२ ॥
आश्लिष्टौ वसुधेत्यथो वसुमती ताभ्यां सितालोहितौ
वर्षन्तौ वसुपार्श्वयोर्विलसतस्तौ शंखपद्मौ निधी ।
अंगान्यन्वथ मातरश्च परितः शक्रादयोऽब्जाश्रया-
स्तद्बाह्येः कुलिशादयः परिपतत्काला नलज्योतिषः ॥ १३ ॥
इत्थं विष्णु-शिवादि-तत्वतनवे श्रीवक्रतुण्डाय
हुंकाराक्षिप्त-समस्तदैत्य पृतनाव्राताय दीप्तत्विषे ।
आनन्दैक-रसावबोधलहरी विध्वस्तसर्वोर्मये
सर्वत्र प्रथमानमुग्धमहसे तस्मै परस्मै नमः ॥ १४ ॥
सेवा हेवाकिदेवा-सुरनरनिकर-स्फार-कोटीर-कोटि-
काटिव्याटीकमान-द्युमणिसममणि-श्रेणिभावेणिकानाम् ।
राजन्नीराजनश्री-सखचरणनख-द्योतविद्योतमानः
श्रेयः स्थेयः स देयान् मम विमलदृशो
बन्धुरं सिन्धुरास्यः ॥ १५ ॥
एतेन प्रकटरहस्यमन्त्रमाला-गर्भेण
स्फुटतरसंविदा स्तवेन ।
यः स्तौति प्रचुरतरं महागणेशं तस्येयं
भवति वशंवदा त्रिलोकी ॥ १६ ॥
॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्य-
श्रीराघवचैतन्यविरचितं महागणपतिस्तोत्रं समाप्तम् ॥

Proofread by Ravin Bhalekar ravibhalekar at hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated April 23, 2004